श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री गुरुवायूरप्प सहस्रनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री गुरुवायूरप्प सहस्रनामस्तोत्रम् ॥

## ध्यानम्

सूर्यस्पर्धिकिरीटमूर्ध्वतिलकप्रोद्भासिफालान्तरं
कारुण्याकुलनेत्रमार्द्रहसितोल्लासं सुनासापुटम्।
गण्डोद्यन्मकराभकुण्डलयुगं कण्ठोज्वलत्कौस्तुभं
त्वद्रूपं वनमाल्यहारपटलश्रीवत्सदीप्रं भजे॥

केयूराङ्गदकङ्कणोत्तममहारत्नाङ्गुलीयाङ्कित-
श्रीमद्बाहुचतुष्कसङ्गतगदाशङ्खारिपङ्केरुहाम्।
काञ्चित्काञ्चनकाञ्चिलाञ्छितलसत्पीताम्बरालम्बिनी-
मालम्बे विमलाम्बुजद्युतिपदां मूर्तिं तवार्तिच्छिदम्॥

यत्त्रैलोक्यमहीयसोऽपि महितं सम्मोहनं मोहनात्
कान्तं कान्तिनिधानतोऽपि मधुरं माधुर्यधुर्यादपि।
सौन्दर्योत्तरतोऽपि सुन्दरतरं त्वद्रूपमाश्चर्यतो-
ऽप्याश्चर्यं भुवने न कस्य कुतुकं पुष्णाति विष्णो विभो॥

## अथ सहस्रनामस्तोत्रम्

गुरुवायूपुराधीशो सान्द्रानन्दावबोधदः।
रुजासाकल्यसंहर्ता दुरिताडविदाहकः॥ १॥

वायुरूपो वागतीतः सर्वबाधाप्रशामकः।
युगन्धरो युगातीतो योगमायासमन्वितः॥ २॥

पुरुजित् पुरुषव्याघ्रः पुराण पुरुषः प्रभुः।
राधा कान्तः रमाकान्तः रतीरमणजन्मदः॥ ३॥

धीरोऽधीशो धनाध्यक्षो धरणीपतिरच्युतः।
शरण्यः शर्मदः शान्तः सर्वशान्तिकरः स्मृतः॥ ४ ॥

मतिमान् माधवो मायी मानातीतो महाद्युतिः।
मतिमोहपरिच्छेत्ता क्षयवृद्धिविवर्जितः॥ ५ ॥

रोगपावकदग्धानाममृतस्यन्ददायकः।
गतिस्समस्तलोकानाम् गणनातीत वैभवः॥ ६ ॥

मरुद्गण समाराध्यो मारुतागारवासकः।
पालकस्सर्वलोकानां पूरकस्सर्वकर्मणाम्॥ ७ ॥

कुरुविन्दमणीबद्ध दिव्यमालाविभूषितः।
रुक्महारावलीलोल वक्षः शोभाविराजितः॥ ८ ॥

सूर्यकोटिप्रभाभास्वद्बालगोपाल विग्रहः।
रत्नमायूर पिञ्छोद्यत् सौवर्णमुकुटाञ्चितः॥ ९ ॥

काळाम्बुदरुचिस्पर्धि केशभारमनोहरः।
मालेयातिलकोल्लासिफालबालेन्दुशोभितः॥ १० ॥

आर्तदीनकथालापदत्त श्रोत्र द्वयान्वितः।
भ्रूलताचलनोद्भूत निर्धूतभुवनावलिः॥ ११ ॥

भक्ततापप्रशमनपीयूष स्यन्दिलोचनः।
कारुण्य स्निग्धनेत्रान्तः काङ्क्षितार्थप्रदायकः॥ १२ ॥

अनोपमितसौभाग्य नासाभङ्गिविराजितः।
मकरमत्स्यसमाकार रत्नकुण्डलभूषितः॥ १३ ॥

इन्द्रनीलशिलादर्श गण्डमण्डलमण्डितः।
दन्तपङ्क्ति द्वयोद्दीप्तदरस्मेरमुखाम्बुजः॥ १४ ॥

मन्दस्मितप्रभामुग्ध सर्वदेवगणावृतः।
पक्वबिम्ब फलाधरः ओष्ठकान्तिविलासितः॥ १५ ॥

सौन्दर्यसारसर्वस्वचिबुकश्रीविराजितः।
कौस्तुभाललसत्कण्ठः वन्यमालावलीवृतः॥ १६ ॥

महालक्ष्मी समाविष्ट श्रीवत्साङ्कितवक्षसः।
रत्नाभरणशोभाड्यः रमणीयकशेवधिः॥ १७ ॥

वलयाङ्गद केयूर कमनीय भुजान्वितः।
वेणुनाळिलसद्धस्तः प्रवाळाङ्गुलिशोभितः॥ १८ ॥

चन्दनागरुकाश्मीर कस्तूरीकळभाञ्चितः।
अनेककोटि ब्रह्माण्ड सङ्गृहीत महोदरः॥ १९ ॥

कृशोदरः पीतचेलापरिवीतकटीतटः।
ब्रह्मावास महापद्मावालनाभिप्रशोभितः॥ २० ॥

पद्मनाभः रमाकान्तः फुल्लपद्मनिभाननः।
रशनादामसन्नद्ध हेमवस्त्रपरिच्छदः॥ २१ ॥

गोपस्त्री हृदयोन्माथिकोमळोरुद्वयान्वितः।
नीलाश्मपेटकाकारजानुद्वन्द्वमनोहरः॥ २२ ॥

कामतूणीरसङ्काशचारुजङ्घाविशोभितः।
नमज्जनसमस्तार्ति हारिपादद्वयान्वितः॥ २३ ॥

वैद्यनाथ प्रणमितः वेदवेदाङ्गकारकः।
सर्वतापप्रशमनः सर्वरोगनिवारकः॥ २४ ॥

सर्वपाप प्रमोचकः दुरितार्णवतारकः।
ब्रह्मरूपः सृष्टिकर्ता विष्णुरूपः परित्राता॥ २५ ॥

शिवरूपः सर्वभक्षः क्रियाहीनः परम्ब्रह्मः।
विकुण्ठलोकसंवासी वैकुण्ठो वरदो वरः॥ २६ ॥

सत्यव्रततपप्रीतः शिशुमीनस्वरूपवान्।
महामत्स्य त्वमापन्नो बहुधावर्धितः स्वभूः॥ २७ ॥

वेदशास्त्रपरित्राता हयग्रीवासुहारकः।
क्षीराब्धिमथनाध्यक्षः मन्दरच्युतिरोधकः॥ २८ ॥

धृतमहाकूर्मवपुः महापतगरूपधृक्।
क्षीराब्धिमथनोद्भूतरत्नद्वयपरिग्रहः॥ २९ ॥

धन्वन्तरीरूपधारी सर्वरोगचिकित्सकः।
सम्मोहितदैत्यसङ्घः मोहिनीरूपधारकः॥ ३० ॥

कामेश्वरमनस्थैर्यनाशकः कामजन्मदः।
यज्ञवाराहरूपाढ्यः समुद्धृत महीतलः॥ ३१ ॥

हिरण्याक्षप्राणहारी देवतापसतोषकः।
हिरण्यकशिपुक्रौर्य भीतलोकाभिरक्षकः॥ ३२ ॥

नारसिंहवपुः स्थूलसडाघट्टितखेचरः।
मेघारावप्रतिद्वन्द्विघोरगर्जनघोषकः॥ ३३ ॥

वज्रक्रूर नखोद्खात दैत्य गात्रप्रभेदकः।
असुरास्यग्वसामांसलिप्त भीषणरूपवान्॥ ३४ ॥

सन्त्रस्तदेवर्षिसङ्घः भयभीतजगत्त्रयः।
प्रह्लादस्तुतिसन्तुष्टः शान्तः शान्तिकरः शिवः॥ ३५ ॥

देवहूतीसुतः प्राज्ञः साङ्ख्ययोगप्रवाचकः।
महर्षिः कपिलाचार्यः धर्माचार्यकुलोद्वहः॥ ३६ ॥

वेनदेहसमुद्भूतः पृथुः पृथुलविक्रमः।
गोरूपिणीमहीदोग्धा सम्पद्दुग्धसमार्जितः॥ ३७ ॥

आदितेयो काश्यपश्च वटुरूपधरः पटुः।
महाबलीबलध्वंसी वामनो याचको विभुः॥ ३८ ॥

विपादमातत्रैलोक्यः त्रिविक्रमः त्रयीमयः।
जामदग्न्यो महावीरः शिव शिष्यः प्रतापवान्॥ ३९ ॥

कार्तवीर्यशिरच्छेत्ता सर्वक्षत्रियनाशकः।
समन्तपञ्चकस्रष्टा पितृप्रीतिविधायकः॥ ४०॥

सर्वसङ्गपरित्यागी वरुणाल्लब्धकेरळः।
कौसल्यातनयो रामः रघुवंशसमुद्भवः॥ ४१॥

अजपौत्रो दाशरथिः शत्रुघ्नभरताग्रजः।
लक्ष्मण प्रियभ्राता च सर्वलोक हितेरतः॥ ४२॥

वसिष्ठशिष्यः सर्वज्ञः विश्वामित्रसहायकः।
ताटकामोक्षकारी च अहल्याशापमोचकः॥ ४३॥

सुबाहु प्राणहन्ता च मारीचमदनाशनः।
मिथिलापुरीसम्प्राप्तः शैवचापविभञ्जकः॥ ४४॥

सन्तुषित सर्वलोको जनकप्रीतिवर्धकः।
गृहीतजानकीहस्तः सम्प्रीतस्वजनैर्युतः॥ ४५॥

परशुधरगर्वहन्ता क्षत्रधर्मप्रवर्धकः।
सन्त्यक्तयौवराज्यश्च वनवासे नियोजितः॥ ४६॥

सीतालक्ष्मणसंयुक्तः चीरवासोजटाधरः।
गुहद्रोणीमुपाश्रित्यगङ्गापारमवाप्तवान्॥ ४७॥

संसारसागरोत्तारपादस्मरणः पावनः।
रोगपीडा प्रशमनः दौर्भाग्यध्वान्त भास्करः॥ ४८॥

काननावाससन्तुष्टः वन्यभोजनतोषितः।
दुष्टराक्षससंहर्ता मुनिमण्डलपूजितः॥ ४९॥

कामरूपाशूर्पणखानासाकर्णविकृन्तकः।
खरमुखासुरमुख्यानामसङ्ख्यबलनाशकः॥ ५०॥

मायामृगसमाकृष्टः मायामानुषमूर्तिमान्।
सीताविरहसन्तप्तः दारान्वेषणव्यापृतः॥ ५१॥

जटायुमोक्षदाता च कबन्धगतिदायकः।
हनुमत्सुग्रीवसखा वालिजीवविनाशकः॥ ५२॥

लीला निर्मित सेतुश्च विभीषणनमस्कृतः।
दशास्यजीवसंहर्ता भूमिभारविनाशकः॥ ५३॥

धर्मज्ञो धर्मनिरतो धर्माधर्मविवेचकः।
धर्ममूर्तिस्सत्यसन्धः पितृसत्यपरायणः॥ ५४॥

मर्यादापुरुषोरामः रमणीयगुणाम्बुधिः।
रोहिणीतनयो रामः बलरामः बलोद्धतः॥ ५५॥

कृष्णज्येष्ठो गदाहस्तः हली च मुसलायुधः।
सदामदो महावीरः रुक्मिसुतनिकृन्तनः॥ ५६॥

कालिन्दीदर्पशमनः कालकालसमः सुधीः।
आदिशेषो महाकायः सर्वलोकधुरन्धरः॥ ५७॥

शुद्धस्फटिकसङ्काशो नीलवासो निरामयः।
वासुदेवो जगन्नाथः देवकीसूनुरच्युतः॥ ५८॥

धर्मसंस्थापको विष्णुरधर्मिगणनाशकः।
कात्यायनीसहजनी नन्दगोपगृहेभृतः॥ ५९॥

कंसप्रेरित पैशाच बाधासङ्घविनाशकः।
गोपालः गोवत्सपालः बालक्रीडाविलासितः॥ ६०॥

क्षीरचोरो दधिचोरः गोपस्त्री हृदयचोरः।
घनश्यामो मयूरपिञ्छाभूषितशीर्षकः॥ ६१॥

गोधूळी मलिनाकारो गोलोकपतिः शाश्वतः।
गर्गर्षिकृतसंस्कारः कृष्णनामप्रकीर्तितः॥ ६२॥

आनन्दरूपः श्रीकृष्णः पापनाशकरः कृष्णः।
श्यामवर्णतनुः कृष्णः शत्रुसंहारकः कृष्णः॥ ६३॥

लोकसङ्कर्षकः कृष्णः सुखसन्दायकः कृष्णः।
बाललीलाप्रमुदितः गोपस्त्री भाग्यरूपकः॥ ६४ ॥

नवनीतप्रियः सर्प्यश्नी दुग्धभक्षण तत्परः।
वृन्दावनविहारी च काळिन्दी क्रीडनोत्सुकः॥ ६५ ॥

गवलमुरळीवेत्रः पशुवत्सानुपालकः।
अघासुरप्राणहारी ब्रह्मगर्वविनाशकः॥ ६६ ॥

काळीयमदमर्दकः परिपीतदवानलः।
दुरितवनदाहकः प्रलम्बासुरनाशकः॥ ६७ ॥

कामिनीजनमोहनः कामतापविनाशकः।
इन्द्रयाग निरोधकः गोवर्धनाद्रि पूजकः॥ ६८ ॥

इन्द्रदर्पविपाटकः गोवर्धनोगिरिधरः।
सुरभिदुग्धाभिषिक्तो गोविन्देतिप्रकीर्तितः॥ ६९ ॥

वरुणार्चितपादाब्जः संसाराम्बुधितारकः।
रासलीलाविलासितः शृङ्गारैकरसालयः॥ ७० ॥

मुरळीगानमाधुर्यमत्ता गोपीजनावृतः।
राधामानसतोषकः सर्वलोक सन्तोषकः॥ ७१ ॥

गोपिकागर्वशमनः विरहक्लेशनाशकः।
सुदर्शनचक्रधरः शापमुक्तसुदर्शनः॥ ७२ ॥

शङ्खचूडकृतान्तश्च अरिष्टासुरमर्दकः।
शूरवंशकुलोद्भवः केशवः केशिसूदनः॥ ७३ ॥

व्योमासुरविनाशकः व्योमचारप्रणमितः।
दुष्टकंसवधोद्युक्तः मथुरापुरिमाप्तवान्॥ ७४ ॥

बलरामसहवर्ती यागचापविपाटकः।
कुवलयापीडमर्दकः पिष्टचाणूरमुष्टिकः॥ ७५ ॥

कंसप्राणसमाहर्ता यदुवंशविमोचकः।
जरासन्धपराभूतः यवनेश्वरदाहकः॥ ७६ ॥

द्वारकापुरनिर्माता मुचुकुन्दगतिप्रदः।
रुक्मिणीहारको रुक्मिवीर्यहन्ताऽपराजितः॥ ७७ ॥

परिगृहीतस्यमन्तकः धृतजाम्बवतीकरः।
सत्यभामापतिश्चैव शतधन्वानिहन्तकः॥ ७८ ॥

कुन्तीपुत्रगुणग्राही अर्जुनप्रीतिकारकः।
नरकारिर्मुरारी च बाणहस्तनिकृन्तकः॥ ७९ ॥

अपहृतपारिजातः देवेन्द्रमदभञ्जकः।
नृगमोक्षदः पौण्ड्रकवासुदेवगतिप्रदः॥ ८० ॥

काशिराजशिरच्छेत्ता भस्मीकृतसुदक्षिणः।
जरासन्धमृत्युकारी शिशुपालगतिप्रदः॥ ८१ ॥

साल्वप्राणापहारी च दन्तवक्त्राभिघातकः।
युधिष्ठिरोपदेष्टा च भीमसेनप्रियङ्करः॥ ८२ ॥

अर्जुनाभिन्नमूर्तिश्च माद्रीपुत्रगुरुस्तथा।
द्रौपदीरक्षकश्चैव कुन्तीवात्सल्यभाजनः॥ ८३ ॥

कौरवक्रौर्य सन्दष्ट पाञ्चाली शोकनाशकः।
कौन्तेयदूतः तेजस्वी विश्वरूपप्रदर्शकः॥ ८४ ॥

निरायुधो निरातङ्को जिष्णुसुतो जनार्दनः।
गीतोपदेष्टा लोकेशः दुखमौड्य निवारकः॥ ८५ ॥

भीष्मद्रोणद्रौणी कर्णाद्यग्निज्वाला प्रशामकः।
कुचेलपत्नी दारिद्र्य दुःखबाधा विमोचकः॥ ८६ ॥

अजः कालविधाता च आर्तिघ्नः सर्वकामदः।
अनलो अव्ययो व्यासः अरुणानुजवाहनः॥ ८७ ॥

अखिलः प्राणदः प्राणः अनिलात्मजसेवितः।
आदिभूतः अनाद्यन्तः क्षान्तिक्लान्ति विवर्जितः॥ ८८ ॥

आदितेयो विकुण्ठात्मा वैकुण्ठो विष्टरश्रवा।
इज्यः सुदर्शनो ईड्यः इन्द्रियाणामगोचरः॥ ८९ ॥

उत्तमः सत्तमो उग्रः उदानः प्राणरूपकः।
व्यानापानो समानश्च जीवमृत्यु विभाजकः॥ ९० ॥

ऊर्ध्वगो ऊहितो ऊह्यः ऊहातीत प्रभाववान्।
ऋतम्भरो ऋतुधरः सप्तर्षिगणसेवितः॥ ९१ ॥

ऋषिगम्यो ऋभुर्ऋद्धिः सनकादिमुनिस्तुतः।
एकनाथो एकमूर्तिरीतिबाधाविनाशकः॥ ९२ ॥

ऐन्धनो एषणीयश्च अनुल्लङ्घितशासनः।
ओजस्करो ओषधीशो ओड्रमालाविभूषितः॥ ९३ ॥

औषधः सर्वतापानां समानाधिक्यवर्जितः।
कालभृत् कालदोषघ्नः कार्यज्ञः कर्मकारकः॥ ९४ ॥

खड्गी खण्डकः खद्योतः खली खाण्डवदाहकः।
गदाग्रजो गदापाणी गम्भीरो गर्वनाशकः॥ ९५ ॥

घनवर्णो घर्मभानुः घटजन्मनमस्कृतः।
चिन्तातीतः चिदानन्दः विश्वभ्रमणकारकः॥ ९६ ॥

छन्दकः छन्दनः छन्नः छायाकारकः दीप्तिमान्।
जयो जयन्तो विजयो ज्ञापकः ज्ञानविग्रहः॥ ९७ ॥

धर्धरापन्निवारकः धणधणितनूपुरः।
टङ्कटीकप्रणमितः ठक्कुरो दम्भनाशकः॥ ९८ ॥

तत्वातीतः तत्वमूर्तिः तत्वचिन्ताप्रचोदकः।
दक्षोदाता दयामूर्तिः दाशार्हो दीर्घलोचनः॥ ९९ ॥

पराजिष्णुः परन्धामः परानन्दसुखप्रदः।
फालनेत्रः फणिशायी पुण्यापुण्यफलप्रदः॥ १०० ॥

बन्धहीनो लोकबन्धुः बालकृष्णः सताङ्गतिः।
भव्यराशिः भिषग्वर्यः भासुरः भूमिपालकः॥ १०१ ॥

मधुवैरिः कैटभारिः मन्त्रज्ञो मन्त्रदर्शकः।
यतिवर्यो यजमानः यक्षकर्दमभूषितः॥ १०२ ॥

रङ्गनाथो रघुवरः रसज्ञो रिपुकर्शनः।
लक्ष्यो लक्ष्यज्ञः लक्ष्मीकः लक्ष्मीभूमि निषेवितः॥ १०३ ॥

वर्षिष्ठो वर्धमानश्च करुणामृतवर्षकः।
विश्वो वृद्धो वृत्तिहीनः विश्वजित् विश्वपावनः॥ १०४ ॥

शास्ता शंसितः शंस्तव्यः वेदशास्त्रविभावितः।
षडभिज्ञः षडाधारपद्मकेन्द्रनिवासकः॥ १०५ ॥

सगुणो निर्गुणो साक्षी सर्वजित् साक्षिवर्जितः।
सौम्यः क्रूरः शान्तमूर्तिः क्षुब्धः क्षोभविनाशकः॥ १०६ ॥

हर्षकः हव्यभुक् हव्यः हिताहितविभावकः।
व्योम व्यापनशीलश्च सर्वव्यापिर्महेश्वरः॥ १०७ ॥

नारायणो नारशायी नारायणो नरसखः।
नन्दकी चक्रपाणिश्च पाञ्चजन्य प्रघोषकः॥ १०८ ॥

कुमोदकः पद्महस्तः विश्वरूपो विधिस्तुतः।
आदिशेषोऽप्रमेयश्च अनन्तः ज्ञानविग्रहः॥ १०९ ॥

भक्तिगम्यः परन्धामः परमो भक्तवत्सलः।
परञ्ज्योतिः परब्रह्म परमेष्ठिः परात्परः॥ ११० ॥

विश्वाधारो निराधारः सदाचारप्रचारकः।
महायोगी महावीरो महारूपो महाबलः॥ १११ ॥

महाभोगी हविर्भोक्ता महायागफलप्रदः।
महासत्वो महाशक्तिः महायोद्धामहाप्रभुः॥ ११२॥

महामोहो महाकोपः महापातकनाशकः।
शान्तः शान्तिप्रदः शूरः शरणागतपालकः॥ ११३॥

पद्मपादः पद्मगर्भः पद्मपत्रनिभेक्षणः।
लोकेशः शर्वः कामेशः कामकोटिसमप्रभः॥ ११४॥

महातेजो महाब्रह्मा महाज्ञानो महातपः।
नीलमेघनिभः श्यामः शुभाङ्गः शुभकारकः॥ ११५॥

कमनः कमलाकान्तः कामितार्थप्रदायकः।
योगिगम्यो योगरूपो योगी योगेश्वरेश्वरः॥ ११६॥

भवो भयकरः भानुः भास्करो भवनाशकः।
किरीटी कुण्डली चक्री चतुर्बाहुसमन्वितः॥ ११७॥

जगत्प्रभुर्देवदेवः पवित्रः पुरुषोत्तमः।
अणिमाद्यष्टसिद्धीशः सिद्धः सिद्धगणेश्वरः॥ ११८॥

देवो देवगणाध्यक्षो वासवो वसुरक्षकः।
ओङ्कारः प्रणवः प्राणः प्रधानः प्रक्रमः क्रतुः॥ ११९॥

नन्दिर्नान्दिदो नाभ्यश्च नन्दगोपतपःफलः।
मोहनो मोहहन्ता च मैत्रेयो मेघवाहनः॥ १२०॥

भद्रः भद्रङ्करो भानुः पुण्यश्रवणकीर्तनः।
गदाधरो गदध्वंसी गम्भीरो गानलोलुपः॥ १२१॥

तेजसस्तेजसां राशिः त्रिदशः त्रिदशार्चितः।
वासुदेवो वसुभद्रः वदान्यो वल्गुदर्शनः॥ १२२॥

देवकीनन्दनः स्रग्वी सीमातीत विभूतिमान्।
वासवो वासराधीशः गुरुवायूपुरेश्वरः॥ १२३॥

यमो यशस्वी युक्तश्च योगनिद्रापरायणः।
सूर्यः सुरार्यमार्कश्च सर्वसन्तापनाशकः॥ १२४ ॥

शान्ततेजो महारौद्रः सौम्यरूपोऽभयङ्करः।
भास्वान् विवस्वान् सप्ताश्वः अन्धकारविपाटकः॥ १२५ ॥

तपनः सविता हंसः चिन्तामणिरहर्पतिः।
अरुणो मिहिरो मित्रः नीहारक्लेदनाशकः॥ १२६ ॥

आदित्यो हरिदश्वश्च मोहलोभविनाशकः।
कान्तः कान्तिमताङ्कान्तिः छायानाथोदिवाकरः॥ १२७ ॥

स्थावरजङ्गमगुरुः खद्योतो लोकबान्धवः।
कर्मसाक्षी जगच्चक्षुः कालरूपः कृपानिधिः॥ १२८ ॥

सत्वमूर्तिस्तत्वमयः सत्यरूपो दिवस्पतिः।
शुभ्रांशुः चन्द्रमा चन्द्रः ओषधीशो निशापतिः॥ १२९ ॥

मृगाङ्कः माः क्षपानाथः नक्षत्रेशः कलानिधिः।
अङ्गारको लोहितांशुः कुजः भौमोमहीसुतः॥ १३० ॥

रौहिणेयो बुधः सौम्यः सर्वविद्याविधायकः।
वाचस्पतिर्गुरुर्जीवः सुराचार्यो बृहस्पतिः॥ १३१ ॥

उशना भार्गवः काव्यः कविः शुक्रोऽसुरगुरुः।
सूर्यपुत्रो शनिर्मन्दः सर्वभक्षः शनैश्चरः॥ १३२ ॥

विधुन्तुदः तमोराहुः शिखी केतुर्विरामदः।
नवग्रहस्वरूपश्च ग्रहकोपनिवारकः॥ १३३ ॥

दशानाथः प्रीतिकरः मापको मङ्गलप्रदः।
द्विहस्तश्च महाबाहुः कोटिकोटिभुजैर्युतः॥ १३४ ॥

एकमुखो बहुमुखः बहुसाहस्रनेत्रवान्।
बन्धकारी बन्धहीनः संसारी बन्धमोचकः॥ १३५ ॥

ममतारूपोऽहम्बुद्धिः कृतज्ञः काममोहितः।
नानामूर्तिधरः शक्तिः भिन्नदेवस्वरूपधृक्॥ १३६ ॥

सर्वभूतहरः स्थाणुः शर्वोभीमः सदाशिवः।
पशुपतिः पाशहीनः जटी चर्मी पिनाकवान्॥ १३७ ॥

विनायको लम्बोदरः हेरम्बो विघ्ननाशकः।
एकदन्तो महाकायः सिद्धिबुद्धि प्रदायकः॥ १३८ ॥

गुहः स्कन्दो महासेनः विशाखः शिखिवाहनः।
षडाननो बाहुलेयः कुमारः क्रौञ्चभञ्जकः॥ १३९ ॥

आखण्डलो सहस्राक्षः वलारातिश्शचीपतिः।
सूत्रामा गोत्रभिद् वज्री ऋभुक्षा वृत्रहावृषा॥ १४० ॥

ब्रह्मा प्रजापतिर्धाता पद्मयोनिः पितामहः।
सृष्टिकर्ता सुरज्येष्ठः विधाता विश्वसृट् विधिः॥ १४१ ॥

प्रद्युम्नो मदनो कामः पुष्पबाणो मनोभवः।
लक्ष्मीपुत्रो मीनकेतुरनङ्गः पञ्चशरः स्मरः॥ १४२ ॥

कृष्णपुत्रो शर्वजेता इक्षुचापो रतिप्रियः।
शम्बरघ्नो विश्वजिष्णुः विश्वभ्रमणकारकः॥ १४३ ॥

बर्हिः शुष्मा वायुसखः आश्रयाशो विभावसुः।
ज्वालामाली कृष्णवर्त्मा हुतभुक् दहनः शुची॥ १४४ ॥

अनिलः पवनो वायुः प्रषदश्वः प्रभञ्जनः।
वातः प्राणो जगत् प्राणः गन्धवाहः सदागतिः॥ १४५ ॥

पाशायुधो नदीकान्तः वरुणो यादसाम्पतिः।
राजराजो यक्षराजः पौलस्त्यो नरवाहनः॥ १४६ ॥

निधीशः त्र्यम्बकसखः एकपिङ्गो धनेश्वरः।
देवेशो जगदाधारः आदिदेवो परात्परः॥ १४७ ॥

महात्मा परमात्मा च परमानन्ददायकः।
धरापतिः स्वर्पतिश्च विद्यानाथो जगत् पिता॥ १४८ ॥

पद्महस्तः पद्ममाली पद्मशोभिपदद्वयः।
मधुवैरिः कैटभारिः वेदधृक् वेदपालकः॥ १४९ ॥

चण्डमुण्डशिरच्छेत्ता महिषासुरमर्दकः।
महाकाळीरूपधरः चामुण्डीरूपधारकः॥ १५० ॥

निशुम्भशुम्भसंहर्ता रक्तबीजासुहारकः।
भण्डासुरनिषूदको ललितावेषधारकः॥ १५१ ॥

ऋषभो नाभिपुत्रश्च इन्द्रदौष्टय प्रशामकः।
अव्यक्तो व्यक्तरूपश्च नाशहीनो विनाशकृत्॥ १५२ ॥

कर्माध्यक्षो गुणाध्यक्षः भूतग्रामविसर्जकः।
क्रतुर्यज्ञः हुतोमन्त्रः पिता माता पितामहः॥ १५३ ॥

वेद्यो वेदः गतिर्भर्ता साक्षीकारकः वेदविद्।
भोक्ता भोज्यः भुक्तिकर्म भोज्याभोज्य विवेकः च॥ १५४ ॥

सदाचारो दुराचारः शुभाशुभ फलप्रदः।
नित्योऽनित्यः स्थिरश्चलः दृश्यादृश्यः श्रुताश्रुतः॥ १५५ ॥

आदिमध्यान्तहीनश्च देही देहः गुणाश्रयः।
ज्ञानः ज्ञेयः परिज्ञाता ध्यानः ध्याता परिध्येयः॥ १५६ ॥

अविभक्तो विभक्तश्च पृथग्रूपः गुणाश्रितः।
प्रवृत्तिश्च निवृत्तिश्च प्रकृतिर्विकृतिरूपधृक्॥ १५७ ॥

बन्धनो बन्धकर्ता च सर्वबन्धविपाटकः।
पूजितः पूजकश्चैव पूजाकर्मविधायकः॥ १५८ ॥

वैकुण्ठवासः स्वर्वासः विकुण्ठहृदयालयः।
ब्रह्मबीजो विश्व बिन्दुर्जडजीवविभाजकः॥ १५९ ॥

पिण्डाण्डस्थः परन्धामः शब्दब्रह्मस्वरूपकः।
आधारषट्कनिलयः जीवव्यापृतिचोदकः॥ १६० ॥

अनन्तरूपो जीवात्मा तिग्मतेजाः स्वयम्भवः।
अनाद्यन्तः कालरूपः गुरुवायूपुरेश्वरः॥ १६१ ॥

गुरुर्गुरुतमो गम्योः गन्धर्वगणवन्दितः।
रुक्मिणीवल्लभ शौरी बलरामसहोदरः॥ १६२ ॥

परमः परमोदारः पन्नगाशनवाहनः।
वनमाली वर्धमानः वल्लवीवल्लभो वशी॥ १६३ ॥

नन्दसूनुः नित्यतृप्तः नष्टलाभविवर्जितः।
पुरन्दरः पुष्कराक्षः योगीहृत्कमलालयः॥ १६४ ॥

रेणुकातनयो रामः कार्तवीर कुलान्तकः।
शरण्यः शरणः शान्तः शाश्वतः स्वस्तिदायकः॥ १६५ ॥

रोगघ्नः सर्वपापघ्नः कर्मदोषभयापहः।
गभस्तिमाली गर्वघ्नो गर्गशिष्यो गवप्रियः॥ १६६ ॥

तापसो तापशमनः ताण्डवप्रियनन्दितः।
पङ्क्तिस्यन्दनपुत्रश्च कौसल्यानन्दवर्धनः॥ १६७ ॥

प्रथितः प्रग्रहः प्राज्ञः प्रतिबन्ध निवारकः।
शत्रुञ्जयो शत्रुहीनः शरभङ्गगतिप्रदः॥ १६८ ॥

मङ्गलो मङ्गलाकान्तः सर्वमङ्गलमङ्गलः।
यज्ञमूर्तिविश्वमूर्तिरायुरारोग्य सौख्यदः॥ १६९ ॥

योगीन्द्राणां त्वदङ्गेष्वधिक सुमधुरं
    मुक्तिभाजां निवासो
भक्तानां कामवर्षद्युतरुकिसलयं
    नाथ ते पादमूलम्।

नित्यं चित्तस्थितं मे पवनपुरपते
    कृष्णकारुण्यसिन्धो
हृत्वा निश्शेषतापान्प्रदिशतु परमा-
    नन्दसन्दोहलक्ष्मीम्॥

॥ इति श्री गुरुवायूरप्प सहस्रनामस्तोत्रं संपूर्णम्॥